# संगमनी

## संस्कृतविभागः

## संस्कृतवृत्त संवाहिका

कालिन्दीमहाविद्यालयः

दिल्ली विश्वविद्यालयः

NAAC accredited Grade 'A+'

प्रथमः अंकः मई 2023

# अनुक्रमणिका


प्रधानाचार्यायाः सन्देशः

विभागाध्यक्षायाः सन्देशः

संपादिकयोः सन्देशः

विभागस्य गतिविधयः

दशदिवसीयसंस्कृतसंभाषणकार्यशाला

अन्ताराष्ट्रियासंगोष्ठी

प्रतियोगिताः

अन्तर्महाविद्यालयीयपत्रवाचनप्रतियोगिता

गद्यपाठप्रतियोगिता

श्लोकोच्चारणप्रतियोगिता

भगवद्गीतास्मृत्याधारितश्लोकोच्चारणप्रतियोगिता
चित्रकर्मप्रतियोगिता च

प्रश्नमञ्चप्रतियोगिता

छात्राणां रचनात्मकलेखाः






# प्रधानाचार्यायाः सन्देशः



**अमृतं संस्कृतं मित्र ! सरसं सरलं वचः। एकतामूलकंराष्ट्रे, ज्ञानविज्ञानपोषकम्॥**

संस्कृतं न केवलं भारतस्य अपितु सम्पूर्णविश्वस्य प्राचीनतमा भाषा अस्ति। विश्वस्य प्राचीनतमं ज्ञानम् वेद माध्यमेन संस्कृतभाषायामेव प्रकाशितं वर्तते। संस्कृते विद्यमानस्य ज्ञानस्य माध्यमेन समाजे समानतायाः ऐकीभावस्य परस्परानुरागस्य सर्वेषां समृद्धेः स्वास्थ्यस्य च बहवः उपदेशाः प्रदत्ताः सन्ति। तेषां समेषां ज्ञानबिन्दूनाम् प्रकाशनम् लोकसमक्षं अतीव आवश्यकम्। अस्य लक्ष्यस्य प्राप्त्यर्थं वर्षेऽस्मिन् कालिन्दीमहाविद्यालयस्य अध्यापकैश्छात्रैश्च संभूय महत्त्वपूर्णविषयेषु विभिन्नानां कार्यक्रमाणां संयोजनं कृतमित्येतदर्थमहं तेषां समेषामभिनन्दनं करोमि। अध्यापकानां छात्राणाञ्च प्रतिभाया विकासाय एतादृशानां शैक्षणिकसंयोजनानामतीव महत्त्वं वर्तते। संस्कृतविभागेन समायोजितानामेतेषां कार्यक्रमाणां सकारात्मकः प्रभावः न केवलं संस्कृताध्यापकानां संस्कृतच्छात्राणामुपरि भवति अपितु महाविद्यालयस्य अन्येषु विषयेषु अध्यापयतामधीयानानाम् चोपर्यपि दरीदृश्यते। एतदर्थं संस्कृतविभागस्य अध्यापकानां छात्राणां च कृते मत्पक्षतः वर्धापनानि ।

**प्रो.(डॉ.) मीना चरांदा**
**प्राचार्या**
**कालिन्दी महाविद्यालयः**

# विभागाध्यक्षायाः सन्देशः



**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।**
**तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम्।।**

संस्कृतभाषा सर्वासु भाषासु उत्तमा वन्दनीया च। देवैः ऋषिभिरपि संस्कृतभाषामेव स्वज्ञानोपदेशानां माध्यमः स्वीकृतः। जीवनस्य यथार्थसत्यसारम् अवगतायाः श्रीमद्भगवद्गीतायाः उपदेशमपि श्रीकृष्णेन कुरुक्षेत्रस्य रणभूमौ स्वश्रीमुखेन संस्कृते एव मुखरीकृतः। लोकप्रतिष्ठितवेदपुराणानामपि रचना संस्कृते एव कृता। लयात्मकता सुरतालेन सुशोभिता संस्कृतभाषा न केवलं गायनाध्ययनयोः यावत् सीमिता अपिच वैज्ञानिकानुसंधानेष्वपि अस्या अतिमहत्ता उपयोगिता च अस्ति। सैन्यबलानाम् अनेके युद्धघोषाः अपि संस्कृते सुसज्जिताः, यथा-
**"शौर्यं दक्षम युद्धेय,बलिदानं परमधर्मा"**। एतदतिरिक्तम् अन्तरिक्षीयगतिविधिषु अन्येषु ग्रहेषु चापि अन्तरिक्षवासिभिः सम्भाषणं कर्तुं संस्कृतभाषा सर्वोपयोगिनी भाषा अस्ति, यतः नासा मन्यते यत् प्रोग्रामिंगकर्तुं संस्कृतभाषा एका सर्वोत्तमा वैज्ञानिकी भाषा अस्ति।
अर्थात् संस्कृतभाषा सर्वेषु क्षेत्रेषु सहायिका, स्वदिव्यतासरलतयोः बुनियादे विश्वे लोकप्रियता एवंच प्रत्येककार्येषु साफल्यं कर्तुं सक्षमा अस्ति।
संस्कृतस्य एताम् आध्यात्मिकतां दर्शयिता संस्कृतसाहित्यपरिषद्, संस्कृतविभागेन प्रकाशिता समाचारपत्रिका **'संगमनी'** छात्राणां संस्कृते अभिव्यक्त्युपलब्धिनवचेतनायाः संचारयितृणां गतिविधीनां संकलनमस्ति। यस्मिन् अनेकैः विद्वद्भिः वर्णितं ज्ञानवर्धनकार्यशालानां संगोष्ठीनां च विवरणमस्ति।
एतदतिरिक्तं छात्राणां प्रतिभां प्रकटीकर्तुं विविधप्रतियोगितायाः निरन्तरायोजनानां समावेशोऽपि अस्यां वार्षिकपत्रिकायाम् अंकितोऽस्ति।
संस्कृतविभागः सदैव मूलरूपेण छात्राणां सर्वांगीणविकासाय सततकार्यरतः। आशास्महे यत् एषा समाचारपत्रिका छात्राः ऊर्जस्विता ताः प्रगतिपथे चलितुं शक्तिं प्रदास्यति, वर्तमानस्य आधुनिकदृष्टिकोणे लुप्तवत्संस्कृतं प्रति रुचिं जागृतं कृत्वा अस्याः पठनाय प्रेरयिष्यति।

**-डॉ. निशा गोयलः**

# संपादिकयोः सन्देशः

## डॉ. दिव्या मिश्रा



संस्कृते ज्ञानस्य अतीव विशाला परम्परा वर्तते । मानवस्य आध्यात्मिक-आधिदैविक- आधिभौतिकोन्नत्यै ऋषिभिः वेदानां साक्षात्कारः कृतः स्वयं च साक्षात्कृत्य वेदान् ऋषयः लोकसमक्षं कृत्वा तेषां प्रकाशनम् कृतवन्तः। तान् वेदानाधारीकृत्य उपनिषदां पुराणानाम् रामायणमहाभारतादिकाव्यानां षड्ङ्गानाम् उपाङ्गानाम् च बहूनाम् प्रणयनम् कृतम् । वेदेभ्यः आरभ्य संस्कृतभाषायां बहूनां काव्यादीनाम् आविष्कारः जातः । अद्यापि सः संस्कृतभाषा- माध्यमेन ज्ञानप्रकाशनाय व्यवहारः लोके सुतरां प्रवर्तमानः दरीदृश्यते। संस्कृतज्ञान - परम्परायाम् विद्यमानानाम् अनेकेषां वैज्ञानिकानुसन्धानानाम् बृहती परम्परा विद्यते । अस्माकम् महाविद्यालयस्य संस्कृताध्यापिकाः संस्कृतच्छात्राश्च महता प्रयासेन अस्याः संस्कृतज्ञान- परम्परायाः निरन्तरम् विकासाय प्रवर्तमानाः सन्ति, तदर्थं विभिन्नाः कार्यक्रमाः महाविद्यालये संयोज्यन्ते। एतेषां कार्यक्रमाणां विशिष्टं विवरणं संगमनीनाम्न्याम् वृत्तसंवाहिकायाम् प्रस्तूयते। तेन संस्कृतातिरिक्ताः अपि छात्राः लाभान्विताः भविष्यन्ति इति वयम् आशास्महे।

## डॉ. ऋचा



**सरलभाषा संस्कृतं, देवभाषा संस्कृतं ।**
**सरससरलमनोज्ञमङ्गलं देवभाषा संस्कृतम् ।।**

गणितं, ज्योतिषं, काव्यशास्त्रमायुर्वेदः, अर्थशास्त्रं राजनीतिशास्त्रं छन्दःशास्त्रं ज्ञान-विज्ञानस्य तत्त्वानि संस्कृतभाषायां समुपलभ्यन्ते। अनेन संस्कृतभाषायाः विपुलं गौरवं स्वयमेव सिध्यति। दिल्लीविश्वविद्यालयस्य कालिन्दीमहाविद्यालयः अनवरतं संस्कृतोत्थाने, संस्कृतप्रसारे च संलग्नः अस्ति। अस्मिन्नेव क्रमे संस्कृतमुन्नयनाय कालिन्दीमहाविद्यालयस्य संस्कृतविभागेन संस्कृतवृत्तसंवाहिकायाः परिकल्पना कृता। या हि पत्रिकारूपेण अनतिचिरमेव सर्वसमक्षमायाति। अस्याः पत्रिकायाः कृते अत्रत्य शिक्षकाणां छात्राणां च महती भूमिका वर्तते। विभागस्य गतिविधीनां, छात्राणां रचनात्मकलेखानां, चित्रकलानां समाहारः च अत्र दृग्गोचरी भवति। ज्ञानपरम्परेयं निरन्तरं अक्षुण्णं प्रवर्धेत् इति कामनापूर्वकं विरमाम्यहम्।

**सर्वेषां मंगलं भूयात्।**


विभागस्य
गतिविधयः

# दशदिवसीयसंस्कृतसंभाषणकार्यशाला




कालिन्दीमहाविद्यालयस्य संस्कृतविभागः संस्कृतभारत्याः संयुक्ततत्वावधाने प्रतिवर्षंसंस्कृत-संभाषण-शिविराणि आयोजयति। प्रतिवर्षानुगुणं द्वाविंशत्युत्तर-द्विसहस्रतमे-वर्षे अपि जुलाई-मासस्य दशम-दिनांकतः विंशति-दिनांक-पर्यन्तं संस्कृतसम्भाषणशिविरस्य आयोजनं विहितम्। देशे पिहितीकरण-कारणात् आभासीयमाध्यमेन आयोजितः एषः कार्यक्रमः विभागाध्यक्षायाः **डॉ.हरविन्दरकौर**महाभागायाः सानिध्ये सम्पन्नः अभूत्। कार्यक्रमेऽस्मिन्पंचाशदधिकाः छात्राः सोत्साहं सहभागं कृतवत्यः । कार्यक्रमस्य उद्घाटन-समारोहे संस्कृत-भारत्याः मुख्यप्रान्त-अधिकारी **डॉ.परमेश-कुमारः** मुख्यातिथित्वेन समुपस्थितः अभवत् । जवाहरलालनेहरूविश्वविद्यालयस्य शोधच्छात्रा **डॉ.स्वीटीरानी** संभाषण-कार्यक्रमस्य अध्यापिकारूपेण कार्यक्रमे सहभागिताम् आवहत् ।

कार्यक्रमस्य समापन-समारोहे संस्कृत-भारत्याः सह-प्रचारकः **डॉ.धनञ्जयः** संस्कृत-संभाषणस्य आयोजनाय संस्कृत-विभागं वर्धापितवान्, तेन अधिकाधिकसंस्कृतसंभाषणाय छात्राः संप्रेरिताः ।

कार्यक्रमस्य अन्तिमे दिने एका संस्कृत-संभाषणप्रतियोगिता अपि समायोजिता। प्रतियोगितायै निर्णायक-रूपेण **डॉ.स्वीटी रानी**, **डॉ.आशीष कुमारश्च** समुपस्थितौ आस्ताम्। अस्यां संस्कृतसंभाषणप्रतियोगितायां प्रथम-वर्षस्य **श्रद्धा**, **सोनाक्षी**श्च प्रथमस्थानं लब्धवत्यौ।

अन्ते शान्तिपाठोच्चारणपूर्वकम् अस्य संभाषण-शिविरस्य सुमंगलसमाप्तिः अभवत् ।



# अन्ताराष्ट्रियासंगोष्ठी




कालिन्दीमहाविद्यालयस्य संस्कृतविभागस्य संस्कृतसाहित्यपरिषदा द्वाविंशत्यधिकद्विसहस्रतमेऽब्दे दिसम्बरमासस्य पञ्चदशदिनाङ्के वैदिकवाङ्मये प्रतिपादितानां शुद्धवायुजलोर्जानां संरक्षणस्य उपायानां विषये एकस्याः संगोष्ठ्या आयोजनं कृतम्। अस्याः संगोष्ठ्याः आदौ कालिन्दी- महाविद्यालयस्य प्राचार्यया **प्रो. नैना हसीजया** मुख्यातिथेः अन्येषां च अतिथीनाम् स्वागतवचोभिः सत्कारः कृतः। अस्याः संगोष्ठ्याः अतिथिरूपेण **प्रो० कमलेशकुमार चौकसी**, **प्रो. राजेश्वरप्रसादमिश्र**श्च इतीमौ आचार्यौ संगोष्ठ्यां समुपस्थितान् विदुषः स्वविचारैः सम्बोधितवन्तौ।




एषः कार्यक्रमः विभागाध्यक्षायाः **डॉ. हरविन्दरकौर**महाभागायाः सान्निध्ये सम्पन्नः अभूत्। अस्यां संगोष्ठ्यां संस्कृतविभागस्य अन्ये प्राध्यापका अपि स्वं महत्त्वपूर्णं योगदानं दत्तवन्तः।






# प्रतियोगिताः

# अन्तर्महाविद्यालयीयपत्रवाचनप्रतियोगिता






कालिन्दीमहाविद्यालये संस्कृतसाहित्यपरिषद्द्वारा द्वाविंशत्यधिक-द्विसहस्रतमेऽब्दे अप्रैलमासस्य सप्तविंशतिदिनाङ्के, एकादश-वादने संगोष्ठीकक्षे **"आधुनिक संस्कृत साहित्यम्- समकालीनसमाजस्य, संस्कृतेः धर्मस्य च परिप्रेक्ष्ये "** इतिविषयमधिकृत्य अन्तर्महाविद्यालयीयपत्रवाचनप्रतियोगितायाः अथ च विशिष्टव्याख्यानस्य आयोजनमभूताम्। पत्रवाचनप्रतियोगितायाम् अस्यां दिल्लीविश्वविद्यालयस्य विभिन्नमहाविद्यालयेभ्यः समागतैः प्रतिभागिभिः स्वशोधपत्राणि प्रस्तुतानि। विशिष्टव्याख्यानाय दिल्लीविश्वविद्यालयस्य सेंट स्टीफनमहाविद्यालयस्य, संस्कृतविभागस्य प्राध्यापकः **डॉ. पंकजकुमारमिश्रः** समुपस्थितः आसीत्।



स्वीये वक्तव्ये **डॉ. पंकजकुमारमिश्रेण** प्रोक्तं यत् साहित्यं समाजस्य दर्पणत्वेन वर्तते। यत्र यत्र साहित्यं विराजते तत्रैव धर्मः तिष्ठति। तेन **'भीमायनम्'** ग्रन्थस्य समुल्लेखपूर्वकं उक्तं यत् रचनेयं समाजस्य प्रत्येकस्मिन् वर्गैः साकं सामञ्जस्यं स्थापयति। एवमेव तेन नैकानां साहित्यकाराणां समुल्लेखपूर्वकं आधुनिकसाहित्यं समाजश्च विषये सारगर्भितं प्रभावपूर्णं च उद्बोधनं प्रदत्तम्।

तदन्नतरं पत्रवाचनप्रतियोगितायाम् दिल्लीविश्वविद्यालयस्य विभिन्नमहाविद्यालयेभ्यः समागतानां प्रतिभागिनां स्वशोधपत्राणि प्रस्तुतानि।

# आधुनिकसंस्कृतसाहित्यम्




## विजेतॄणां सूची

| | | | |
|---|---|---|---|
| प्रथमपुरस्कारः | दीक्षा नेगी | स्नातकजर्नलिज्मविशेषः | तृतीयवर्षः |
| द्वितीयपुरस्कारः | स्नेहा कुमारी | स्नातकसंस्कृतविशेषः | तृतीयवर्षः |
| तृतीयपुरस्कारः | शारदा | स्नातकसंस्कृतविशेषः | प्रथमवर्षः |
| सान्त्वनापुरस्कारः | निधि सिंहः | स्नातकोत्तरसंस्कृतम् | --- |
| सान्त्वनापुरस्कारः | हर्षितः मिश्रा | स्नातकोत्तरसंस्कृतम् | --- |

# गद्यपाठप्रतियोगिता




संस्कृतच्छात्राणां प्रतिभां प्रोत्साहयितुं कालिन्दीमहाविद्यालयस्य संस्कृतविभागेन जनवरीमासे द्वाविंशतिदिनाङ्के द्विविंशत्यधिकद्विसहस्रतमेऽब्दे महाविद्यालयानां छात्राणां कृते गद्यपाठप्रतियोगिता आयोजिता। अस्यां प्रतियोगितायां बहवश्छात्राः भागमग्रहणन् । विजेतारः पुरस्कारानपि प्राप्तवन्तः ।

## विजेतृणां सूची

| क्रमांकः | नाम | वर्षः | पुरस्कारः |
|---|---|---|---|
| 1 | आकांक्षा | तृतीयवर्षः | प्रथमः |
| 2 | मीनाक्षी | द्वितीयवर्षः | द्वितीयः |
| 3 | चञ्चलः | द्वितीयवर्षः | तृतीयः |
| 4 | सविता | तृतीयवर्षः | सांत्वना |
| 5 | श्रद्धा | द्वितीयवर्षः | सांत्वना |
| 6 | सोनाक्षी | द्वितीयवर्षः | सांत्वना |
| 7 | रिया | द्वितीयवर्षः | सांत्वना |

# श्लोकोच्चारणप्रतियोगिता

कालिन्दीमहविद्यालयस्य संस्कृतविभागेन जनवरीमासे अष्टाविंशतितिदिनाङ्के द्विविंशत्यधिकद्विसहस्रतमेऽब्दे संस्कृतच्छात्राणां प्रतिभां प्रोत्साहयितुं श्लोकोच्चारणप्रतियोगिता आयोजिता । अस्याम् प्रतियोगितायां बहवः छात्राः भागमगृहणन्।







| विजेतृणां सूची | | | |
|---|---|---|---|
| 1 | श्वेता | द्वितीयवर्षः | प्रथमः |
| 2 | चञ्चलः | द्वितीयवर्षः | द्वितीयः |
| 3 | शैली | द्वितीयवर्षः | द्वितीयः |
| 4 | स्नेहा | तृतीयवर्षः | तृतीयः |
| 5 | खुशी पाण्डेयः | प्रथमवर्षः | तृतीयः |

# भगवद्गीतास्मृत्याधारितश्लोकोच्चारणप्रतियोगिता चित्रकर्मप्रतियोगिता च

कालिन्दीमहविद्यालयस्य संस्कृतविभागेन अप्रैलमासे पंचविंशतिदिनाङ्के द्विविंशत्यधिकद्विसहस्रतमेऽब्दे संस्कृतच्छात्राणां प्रतिभां प्रोत्साहयितुं भगवद्गीतास्मृत्याधारितश्लोकोच्चारण-प्रतियोगिता, चित्रकर्मप्रतियोगिता च समायोजिते ।
विभागस्य प्राध्यापिकाभ्यां **डॉ.निशा**महाभागया, **डॉ.मंजू**महोदयया च निर्णायिकारूपेण छातृणाम् उत्साहवर्धनं कृतम्।






## भगवद्गीता स्मृत्याधारितश्लोकोच्चारणप्रतियोगिता

| विजेतृणां सूची | | |
|---|---|---|
| शालिनी | प्रथमवर्षः | प्रथमः |
| श्वेता | द्वितीयवर्षः | द्वितीयः |
| प्रिया | द्वितीयवर्षः | तृतीयः |
| स्नेहा | तृतीयवर्षः | सान्त्वना |
| सविता | तृतीयवर्षः | सान्त्वना |



# चित्रकर्मप्रतियोगिता

| विजेतॄणां सूची | | |
|---|---|---|
| तनु | प्रथमवर्षः | प्रथमः |
| श्रद्धा | द्वितीयवर्षः | द्वितीयः |
| श्वेता | द्वितीयवर्षः | तृतीयः |



# प्रश्नमञ्चप्रतियोगिता




कालिन्दीमहाविद्यालयस्य संस्कृतविभागेन द्विविंशत्यधिकद्विसहस्रतमेऽब्दे मईमासस्य पंचमदिनांके प्रश्नमञ्चप्रतियोगिता समायोजिता । प्रतियोगितायां अस्यां नैकाभिः छात्राभिः सोत्साहं भागं गृहीतम्। निर्णायकरूपेण विभागस्य प्राध्यापकौ **डॉ.देशराज**महोदयेन **डॉ.दिव्यामिश्रा**महोदयया छातृणां उत्साहवर्धनं कृतम् ।

## विजेतृणां सूची

| | | | |
|---|---|---|---|
| 1 | शालिनी | प्रथमवर्षः | प्रथमः |
| 2 | अदिति | प्रथमवर्षः | द्वितीयः |
| 3 | अन्तिमा | प्रथमवर्षः | द्वितीयः |
| 4 | प्राञ्जलि | प्रथमवर्षः | तृतीयः |
| 5 | प्रिया | द्वितीयवर्षः | तृतीयः |




# छात्राणां रचनात्मकलेखाः

# कोरोनाकालः एवं पर्यावरणम्

कोरोनाविषाणुः विश्वस्य एकः संक्रामकमहाव्याधिः वर्तते। अस्योत्पत्तिः चीनदेशस्य वुहान इति प्रदेशात् अभवत्। अधुना विश्वस्य बहवः जनाः कोरोना ग्रस्ताः सन्ति। कोरोना संक्रमणेन नैके जनाः कालकवलीभूताः। कोरोना-कालेऽस्मिन् पिहितीकरणेन सर्वेषां देशानां अर्थव्यवस्था सामाजिकजनजीवनं च दुष्प्रभावितम् परं पर्यावरणकृते कालोऽयं सुखमयः आसीत्। विगतषष्टिदिवसेषु पर्यावरणस्थितिः सर्वोत्तमा जाता। पर्यावरण संरक्षणाय इतः प्राक् नैके प्रयासाः अभवन्। परं कोरोना-काले अस्य स्थितिः सर्वाधिकसुखमयी वर्तते। यथा इतः प्राक् क्योटो प्रोटोकालः पेरिसजलवायुसन्धिः समेत्य नैके प्रयासाः देशैः कृताः। परं किमपि सकारात्मकपरिवर्तनं नासीत्। कोरोनामहारोगस्य संकटकालेऽस्मिन् पर्यावरणस्य सकारात्मकपरिवर्तनं अस्माकं कृते उपायनरुपमस्ति। अवसरश्चास्ति यत् पर्यावरणं प्रति जनजागरणं करणीयम्। जलस्रोतसां निर्मलीकरणं वृक्षारोपणं करणीयम्। कोरोनाकाले स्वच्छः जायते। अधुनापि पर्यावरणस्य संरक्षणम् अस्मभ्यम् अवश्यमेव करणीयम्।

**आरती मिश्रा**
**बी.ए. संस्कृत ऑनर्स (द्वितीयः वर्षः)**

# कोरोना : एका महामारी

कोरोनावायरसः एकः विश्वव्यापी संक्रमणमहाव्याधिः अस्ति। यः केवलं जीवित कोशिकायामेव स्ववंशवृद्धिं करोति। कोरोना शरीराद् बहिः मृतसदृशः भवति किंतु शरीरस्य अभ्यन्तरे सजीवो भवति। कोरोनायाः प्रारम्भः चीनदेशस्य वुहाननगरे सन् 2019-2020 मध्ये अभवत्। अस्य रोगस्य स्पष्टं लक्षणम् अस्ति, तीव्रज्वरः अतिकासः श्वसने पीड़ा च। कोरोनाविषाणुः अतिसूक्ष्मः किंतु अतिप्रभावी वायरसः वर्तते। अस्य रोगस्य कारणात् जनाः स्वजीवने अतिप्रभाविताः अभवन्। अस्य निवारणस्य उपायः अस्ति एकैकं परस्मात् दूरे स्थितिः। प्रतिहोरा स्वहस्तं मुखं च फेनिलेन प्रक्षालयेत्। महामारीतः आत्मनः रक्षणाय जनसमर्दस्थलेषु सर्वैः जनैः परस्परं दूरे भवितव्यम्, मुखाच्छादकं च सर्वदा धारणीयम् तथा हस्तप्रक्षालनं च निरंतरं करणीयम्। कोरोनावायरसः संक्रामकमहामारीरुपेण प्रायशः विंशतिलक्षाधिकानाम् जनानां जीवन हानिं कृत्वा अद्यापि वर्धत एव।

**श्रुति**
**स्नातकद्वितीयवर्षः**

# विश्वस्य महाशत्रुः - कोरोना

**कोरोनायाः परिचयः-**

कोरोनायाः प्रारम्भः चीनदेशस्य वुहाननगरे सन् 2019-2020 मध्ये अभवत्। कोरोनावायरसस्य प्रारम्भिकं लक्षणम् अस्ति श्वासक्रियायाः अवरोधः। विश्वस्मिन् विश्वस्वास्थ्यसंगठनं उचितसमये एव अस्य कोरोनावायरसस्य अभिज्ञानम् प्राप्य उचितान् निर्देशान् दत्तवान्। अस्य रोगस्य स्पष्टं लक्षणम् अस्ति - तीव्रज्वरः अतिकासः श्वसने पीड़ा च।

**कोरोनाकालः एवं पर्यावरणम्:-**

वर्तमानकाले विश्वस्मिन् कोरोनावायरसः एकः गम्भीरः व्याधिः वर्तते। एतस्मादेव कारणात् सम्पूर्णः विश्वः अस्य प्रकोपात् आपदाग्रस्तः वर्तते। अस्य रोगस्य कारणात् जनाः स्वजीवने अति प्रभाविताः अभवन्, परञ्च पर्यावरणे अस्य सकारात्मकाः प्रभावाः अभवन्। अस्मात् कारणात् प्रकृतिः अधिकाधिकम् शुद्धम् अभवत्।

**कोरोनायाः आयुर्वेदिकउपचारः -**

कोरोनायाः काले अधोलिखिताः उपचाराः आवश्यकाः सन्ति।

1. **अधिकाधिकम् शुष्कजलस्य प्रयोगः।**
2. **आमलकनिर्मितस्य च्यवनप्राशस्य अधिकाधिकम् सेवनम्।**
3. **तुलसीपत्र सहितस्य चायपेयस्य सेवनम्।**
4. **जम्बीर्मिश्रितं पेयम् गोमूत्रस्य च सेवनम्।**

**सामाजिकसंगठनस्य भूमिकाः-**

कोरोनाकाले विश्वस्य सर्वेषु क्षेत्रेषु जनाः त्रस्ताः आसन्। तस्मिन् काले सामाजिक क्षेत्रे अनेकेषाम् जनानाम् विपत्तिम् दृष्ट्वा मानवानाम् मनोवृत्तिः सम्यक् न आसीत्,जनाः भयग्रस्ताः आसन् यत् न जाने किं भविष्यतीति। एतस्याम् मनःस्थितौ जनान् विपदाग्रस्तान् दृष्ट्वा अनेकानि संगठनानि तेषां साहायताम् कर्तुम् प्रतिनिधीनाम् माध्यमेन अनेकान् कार्यालयान् अकुर्वन्। कोरोनायाः कारणेन औद्योगिक क्षेत्रे व्यवधान कारणात् प्रायशः बहूनाम् श्रमिकाणाम् व्यवसायहानिर्जाता। कार्याभावे तेषां जीवननिर्वाहः अपि कठिनः आसीत् ते सर्वे श्रमिकाः स्वस्वग्रामं प्रति गमनाय उद्यता आसन्। तेषां पार्श्वे भोजनमपि न आसीत् अतः तेषां कृते भोजनव्यवस्थायै अथ च तेषां स्वगृहं प्रति प्रेषणाय सामाजिक संगठनैः व्यवस्था कृता। ऑनलाइन माध्यमेन विद्यार्थीनाम् कृते पाठनमपि प्राचलत् अथ च चिकित्साक्षेत्रे, सुरक्षाक्षेत्रे, स्वच्छताक्षेत्रे च ये कर्मकराः आसन् तेषां कृते पीपीईकिट इत्यादिकं सर्वविदित सौविध्यम् समुत्पादितम्।

**सोनाक्षी राजः**
**स्नातकप्रथमवर्षः**

# एका महामारी विविधानि परिदृश्यानि

कोरोना विषाणुः एकः विश्वव्यापी संक्रमणव्याधिः अस्ति। कोरोना विषाणोः प्रकोपस्य आरम्भः चीनदेशस्य वुहान नगरतः 2019 वर्षे अभवत्। मार्च मासादारभ्य सम्पूर्णे देशे गृहे निर्बंधने सर्वेजनाः स्थिरीकृताः आसन्। अस्मात् कारणात् विद्यालयानाम् , कार्यालयानाम् , चलचित्रगृहाणाम् दुर्दशा अस्ति। ऑनलाइन माध्यमेन कक्षाः भवन्ति किन्तु ग्रामीण क्षेत्रेषु सम्पर्कः सम्यक् न भवति अथ च चक्षुरोगाः अपि जायन्ते। महामारीतः आत्मनः रक्षणाय जनसम्मर्दस्थलेषु सर्वैः जनैः परस्परं दूरे भवितव्यम् मुखाच्छादकं च सर्वदा धारणीयम् हस्तप्रक्षालनं च निरन्तरं करणीयम्। इदानीं भारते अन्येषु च देशेषु वैज्ञानिकाः चिकित्सकैः सह मिलित्वा वैक्सीन आविष्काराय समर्था : जाताः तेन जनाः रक्षिताः भविष्यन्ति । कोरोना वायरसस्य प्रभावः न्यूनः भविष्यति यदि अस्माकं रोगनिरोधकक्षमता वर्द्धिता भविष्यति। आयुर्वेदस्य उपचारमाध्यमेन योगस्य आश्रयणेन च स्वकीयां सुरक्षां साधयितुं शक्नुमः। आयुर्वेदस्य इतिहासः वैदिककालादेव आरभ्यते , अतः पश्चात्सहस्र वर्षेभ्यो अपि प्राचीनो अयं इतिहासः। शतकपर्यन्तम् आयुर्वेदस्य उत्कृष्ट परंपराः न केवलं प्रचारे आसन् अपितु तत्कालीनेषु प्रख्यातेषु नालन्दा , विक्रमशिला , वल्लभी इत्यादिषु विश्वविद्यालयेषु प्रमुखविषयत्वेन पाठ्यन्ते स्म।

सर्वेषां रोगाणां प्रशमनार्थं आयुर्वेदशास्त्रविहितस्य उपचारस्य अवश्यमेव आश्रयणं कर्तव्यम् ।

**स्नेहा कुमारी**
**स्नातकद्वितीयवर्षः**

# कोरोनाकालः

कोरोना विषाणुः एकः विश्वव्यापी संक्रमण अस्ति। कोरोना विषाणुः अनेक प्रकाराणां विषाणूनाम् एकः समूहः भवति। कोरोना विषाणुः मानवेषु श्वासनलिकासु संक्रमणं भवितुमर्हति। कोरोनाविषाणोः प्रकोपस्य आरंभः चीनदेशस्य वुहान नगरतः २०१९ वर्ष आगच्छन्ति स्म। विश्व स्वास्थ्य संगठनेन अस्य विषाणु समूहस्य नाम् कोविद् १९ दतम्। विश्व स्वास्थ्य संगठनेन कथयत् कोविद् १९ एका महामारी अस्ति। कोरोना काले रुग्णः प्रतिरोधक क्षमता कृते पौष्टिक आहारः आवश्यकः अस्ति। द्विगजस्य सामाजिक अन्तरस्य मुखसंरक्षकस्य आवरणस्य प्रयोगस्य च आवश्यकता अस्ति। कोरोना महामारी मुक्तः सर्वे जनाः सहयोगम् अति आवश्यक अस्ति।

**साक्षी झा**
**स्नातकप्रथमवर्षः**



# कोरोना : संक्रामकमहाव्याधिः

कोरोनावायरसः एकः विश्वस्य संक्रामकमहाव्याधिः अस्ति। एतत् श्रूयते अस्य उत्पत्तिः चीनदेशस्य "वुहान" नामकप्रदेशात् अभवत्। अधुना विश्वस्य समस्तराष्ट्राणि अनेन ग्रसितानि सन्ति। कोरोनाविषाणुः अनेकप्रकाराणां एकः समूहः भवति। स्तनधारिषु पक्षिषु च रोगान् जनयति। एते विषाणवः अम्लीयाः आर एन ए राइबो न्यूक्लिक एसिड्स भवन्ति। एतैः मानवानां श्वासनलिकासु संक्रमणं भवितुमर्हति। संक्रमणकारणात् श्वासनिरोधः ,अतिज्वरः, तस्माच्च मृत्युरपि भवेत्। प्रतिदिनं परःसहस्रं जनाः संक्रमिताः भवन्ति म्रियन्ते च। विश्वस्वास्थ्य संगठनेन अस्य विषाणु समूहस्य नाम कोविद् १९ दतम्। अस्य निवारणस्य उपायः अस्ति- एकैकम् परस्मात् दूरे स्थितिः । अर्थात् एकैकम् परस्मात् दूरीकृत्य वसेत्। प्रतिहोरा स्व हस्तं मुखं च फेनिलेन प्रक्षालयेत्। प्रक्षालक द्वारा हस्तौ स्वच्छीकृत्य मुखनासिकाच्छादकस्य प्रयोगं विधीयताम् । प्रतिदिनं गृहस्थानं कीटनाशकं तरल पदार्थेन मिश्रित जलेन प्रचालयेत्। आरोग्यसेतुः स्वचलदूरवाण्यां संस्थाप्य स्वपरीक्षणं कृत्वा नवदृढसंकल्पं कुर्मः इति ममाशा।

**आकांक्षा तिवारी**

**स्नातकद्वितीयवर्षः**





# संस्कृतविभागस्य पक्षतः भवद्भ्यः सर्वेभ्यो हार्दिकाः धन्यवादाः





संस्कृतविभागः
कालिन्दीमहाविद्यालयः
दिल्ली विश्वविद्यालयः
मई 2023